श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ तृतीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ तृतीयः सर्गः ॥

## वसिष्ठवामदेवौ प्रति श्रीरामराज्याभिषेकसामग्रीसङ्ग्रहार्थं राज्ञो दशरथस्यानुरोधस्ताभ्यां सेवकान् प्रति तदनुरूपादेशस्य दानं राजाज्ञया सुमन्त्रेण श्रीरामस्य राजसभायामानयनं राज्ञा श्रीरामं प्रति हितस्योपदेशश्च

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः।
प्रतिगृह्याब्रवीद् राजा तेभ्यः प्रियहितं वचः॥ **2.3.1** ॥

अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम।
यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ॥ **2.3.2** ॥

इति प्रत्यर्चितान् राजा ब्राह्मणानिदमब्रवीत्।
वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम्॥ **2.3.3** ॥

चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः।
यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम्॥ **2.3.4** ॥

राज्ञस्तूपरते वाक्ये जनघोषो महानभूत्।
शनैस्तस्मिन् प्रशान्ते च जनघोषे जनाधिपः॥ **2.3.5** ॥

वसिष्ठं मुनिशार्दूलं राजा वचनमब्रवीत्।
अभिषेकाय रामस्य यत् कर्म सपरिच्छदम्॥ **2.3.6** ॥

तदद्य भगवन् सर्वमाज्ञापयितुमर्हसि।
तच्छ्रुत्वा भूमिपालस्य वसिष्ठो मुनिसत्तमः॥ **2.3.7** ॥

आदिदेशाग्रतो राज्ञः स्थितान् युक्तान् कृताञ्जलीन्।
सुवर्णादीनि रत्नानि बलीन् सर्वौषधीरपि॥ **2.3.8** ॥

शुक्लमाल्यानि लाजांश्च पृथक् च मधुसर्पिषी।
अहतानि च वासांसि रथं सर्वायुधान्यपि॥ **2.3.9** ॥

चतुरङ्गबलं चैव गजं च शुभलक्षणम्।
चामरव्यजने चोभे ध्वजं छत्रं च पाण्डुरम्॥ **2.3.10** ॥

शतं च शातकुम्भानां कुम्भानामग्निवर्चसाम्।
हिरण्यशृङ्गमृषभं समग्रं व्याघ्रचर्म च॥ **2.3.11** ॥

यच्चान्यत् किञ्चिदेष्टव्यं तत् सर्वमुपकल्प्यताम्।
उपस्थापयत प्रातरग्न्यगारे महीपतेः॥ **2.3.12** ॥

अन्तःपुरस्य द्वाराणि सर्वस्य नगरस्य च।
चन्दनस्रग्भिरर्च्यन्तां धूपैश्च घ्राणहारिभिः॥ **2.3.13** ॥

प्रशस्तमन्नं गुणवद् दधिक्षीरोपसेचनम्।
द्विजानां शतसाहस्रं यत्प्रकाममलं भवेत्॥ **2.3.14** ॥

सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयताम्।
घृतं दधि च लाजाश्च दक्षिणाश्चापि पुष्कलाः॥ **2.3.15** ॥

सूर्येऽभ्युदितमात्रे श्वो भविता स्वस्तिवाचनम्।
ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च॥ **2.3.16** ॥

आबध्यन्तां पताकाश्च राजमार्गश्च सिच्यताम्।
सर्वे च तालापचरा गणिकाश्च स्वलङ्कृताः॥ **2.3.17** ॥

कक्ष्यां द्वितीयामासाद्य तिष्ठन्तु नृपवेश्मनः।
देवायतनचैत्येषु सान्नभक्ष्याः सदक्षिणाः॥ **2.3.18** ॥

उपस्थापयितव्याः स्युर्माल्ययोग्याः पृथक्पृथक्।
दीर्घासिबद्धगोधाश्च सन्नद्धा मृष्टवाससः॥ **2.3.19** ॥

महाराजाङ्गनं शूराः प्रविशन्तु महोदयम्।
एवं व्यादिश्य विप्रौ तु क्रियास्तत्र विनिष्ठितौ॥ **2.3.20** ॥

चक्रतुश्चैव यच्छेषं पार्थिवाय निवेद्य च।
कृतमित्येव चाब्रूतामभिगम्य जगत्पतिम्॥ **2.3.21** ॥

यथोक्तवचनं प्रीतौ हर्षयुक्तौ द्विजोत्तमौ।
ततः सुमन्त्रं द्युतिमान् राजा वचनमब्रवीत्॥ **2.3.22** ॥

रामः कृतात्मा भवता शीघ्रमानीयतामिति।
स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात्॥ **2.3.23** ॥

रामं तत्रानयाञ्चक्रे रथेन रथिनां वरम्।
अथ तत्र सहासीनास्तदा दशरथं नृपम्॥ **2.3.24** ॥

प्राच्योदीच्या प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः।
म्लेच्छाश्चार्याश्च ये चान्ये वनशैलान्तवासिनः॥ **2.3.25** ॥

उपासाञ्चक्रिरे सर्वे तं देवा वासवं यथा।
तेषां मध्ये स राजर्षिर्मरुतामिव वासवः॥ **2.3.26** ॥

प्रासादस्थो दशरथो ददर्शायान्तमात्मजम्।
गन्धर्वराजप्रतिमं लोके विख्यातपौरुषम्॥ **2.3.27** ॥

दीर्घबाहुं महासत्त्वं मत्तमातङ्गगामिनम्।
चन्द्रकान्ताननं राममतीव प्रियदर्शनम्॥ **2.3.28** ॥

रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम्।
घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः॥ **2.3.29** ॥

न ततर्प समायान्तं पश्यमानो नराधिपः।
अवतार्य सुमन्त्रस्तु राघवं स्यन्दनोत्तमात्॥ **2.3.30**॥

पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात्।
स तं कैलासशृङ्गाभं प्रासादं रघुनन्दनः॥ **2.3.31**॥

आरुरोह नृपं द्रष्टुं सहसा तेन राघवः।
स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके॥ **2.3.32**॥

नाम स्वं श्रावयन् रामो ववन्दे चरणौ पितुः।
तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः॥ **2.3.33**॥

गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम्।
तस्मै चाभ्युद्यतं सम्यङ्मणिकाञ्चनभूषितम्॥ **2.3.34**॥

दिदेश राजा रुचिरं रामाय परमासनम्।
तथाऽऽसनवरं प्राप्य व्यदीपयत राघवः॥ **2.3.35**॥

स्वयैव प्रभया मेरुमुदये विमलो रविः।
तेन विभ्राजिता तत्र सा सभापि व्यरोचत॥ **2.3.36**॥

विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना।
तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम्॥ **2.3.37**॥

अलङ्कृतमिवात्मानमादर्शतलसंस्थितम्।
स तं सुस्थितमाभाष्य पुत्रं पुत्रवतां वरः॥ **2.3.38**॥

उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः।
ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः॥ **2.3.39**॥

उत्पन्नस्त्वं गुणज्येष्ठो मम रामात्मजः प्रियः।
त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः॥ **2.3.40**॥

तस्मात् त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि।
कामतस्त्वं प्रकृत्यैव निर्णीतो गुणवानिति ॥ **2.3.41** ॥

गुणवत्यपि तु स्नेहात् पुत्र वक्ष्यामि ते हितम्।
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ॥ **2.3.42** ॥

कामक्रोधसमुत्थानि त्यजस्व व्यसनानि च।
परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ॥ **2.3.43** ॥

अमात्यप्रभृतीः सर्वाः प्रजाश्चैवानुरञ्जय।
कोष्ठागारायुधागारैः कृत्वा सन्निचयान् बहून् ॥ **2.3.44** ॥

इष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम्।
तस्य नन्दन्ति मित्राणि लब्ध्वामृतमिवामराः ॥ **2.3.45** ॥

तस्मात् पुत्र त्वमात्मानं नियम्यैवं समाचर।
तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ॥ **2.3.46** ॥

त्वरिताः शीघ्रमागत्य कौसल्यायै न्यवेदयन्।
सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥ **2.3.47** ॥

व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा।
अथाभिवाद्य राजानं रथमारुह्य राघवः।
ययौ स्वं द्युतिमद् वेश्म जनौघैः प्रतिपूजितः ॥ **2.3.48** ॥

ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदा लाभमिवेष्टमाशु।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा देवान् समानर्चुरभिप्रहृष्टाः ॥ **2.3.49** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे तृतीयः सर्गः ॥